# प्रथमरुद्रदाम्नः जुनागडप्रशस्तिः

**प्रश्नः – प्रथमरुद्रदाम्नः जुनागडप्रशस्तिमाश्रित्य संस्कृतभाषया देवनागरलिप्या च संक्षेपेण टीकां लिखत।**

**उत्तरम्** – गुजरातप्रदेशस्य जुनागडनगरात् पूर्वस्यां दिशि गिर्नाराख्यः कश्चित् पर्वतः विराजते। तस्य पर्वतस्य पश्चिमगात्रे पर्वतचूडायाः समीपे एव इयं प्रशस्तिः उत्कीर्णा वर्तते। अत्रेदम् उल्लेख्यं यत् अस्य पर्वतस्य गात्रे एव सम्राजः अशोकस्य गिर्नार-अनुशासनानि तथा स्कन्दगुप्तस्य प्रशस्तिः अपि प्राप्यन्ते।

इयं लिपिः मध्यब्राह्म्या विरचिता। संस्कृतभाषामयी खलु इयं लिपिः। काव्यगुणसमन्वितया भाषया रचितायाम् अस्याम् लिप्याम् केषाञ्चित् शब्दानां प्रयोगः दृश्यते ये शब्दास्तु न पाणिनिसम्मताः इति वक्तुं शक्यते। ननु किमर्थम् इदं सम्पन्नम् इति चेत् केचन कथयन्ति यत्, प्राकृतभाषायाः प्रभावः, प्रादेशिकम् उच्चारणवैशिष्ट्यम्, तथा पाणिनीयव्याकरणविधिः अत्र सम्यक्तया न अनुस्रियते। अस्याम् लिप्याम् ओजोगुणान्वितानि समासवद्धानि दीर्घाणि पदानि आधिक्येन दृश्यन्ते। तस्मात् केचन कथयन्ति यत् इयं लिपिः भवति परवर्तिनि काले विरचितानां गद्यकाव्यानां वीजस्वरूपा।

एतदभिलेख्यानुसारम् सुदर्शनह्रदस्य सेतुः ७२ शकाब्दस्य अर्थात् १५०ख्रीष्टाव्दस्य मार्गशीर्षे मासि विदीर्णः अभवत्। सेतोः पुनः निर्माणार्थं अत्यधिकः कालः न अतिवाहितः अभवत्। सेतोः ध्वंसात् अनन्तरम् रुद्रदाम्नः सचिवेषु सेतुसंस्कारविषये मतानैक्ये समुत्पन्ने कार्यारम्भे विलम्वः

अभवत्। सेतोः विशालः विदीर्णभावः, कार्यारम्भे विलम्बः, कार्यसमापने च अनतिविलम्बः इत्यादिकं विषयजातं विचार्य एवं मन्यते यत् १५२-१५३ ख्रीष्टाव्दे कार्यसमापनात् अनन्तरम् एव इयं प्रशस्तिः विरचिता अभवत्।

सुदर्शनह्रदस्य झञ्झाविध्वस्तः सेतुः अर्थात् तस्य पुनर्निर्माणं भवति अस्य अभिलेखस्य मुख्यः वर्णनीयः विषयः। महाक्षत्रपस्य प्रथमस्य रुद्रदाम्नः शासनकाले ७२ शकाव्दे प्रवलझञ्झया प्रवलवर्षणेन च सुदर्शनह्रदस्य सेतुः भग्नः अभवत्। अयं प्राकारः आसीत् अतीव प्राचीनः। ख्रीष्टपूर्वचतुर्थशतके वैश्येन पुष्यगुप्तेन मौर्यसम्राट् चन्द्रगुप्तः अस्य सेतोः निर्माणकार्यं सम्पादितवान्। ततः परवर्तिनि काले ख्रीष्टपूर्वे तृतीयशतके सम्राजः अशोकस्य शासनकाले यवनराजस्य तुषास्फस्य तत्त्वावधानेन सुदर्शनह्रदस्य प्राकारेण सह प्रणाली संयुक्ता अभवत्। रुद्रदाम्नः शासनकाले झञ्झाविध्वस्तस्य अस्य सेतोः संस्कारकर्णणि सुसम्पन्ने सति अतिमनोहरः आसीत् अयं सेतुः। विषयेऽस्मिन् अभिलेखे एव निगदितम् यत् – ‘महत्युपचये वर्तते’ इति। अत्रेदम् उल्लेख्यम् यत्, अस्मिन् अभिलेखे महाक्षत्रपस्य रुद्रदाम्नः वंशपरिचयः, तस्य गुणाः, आकृतिः, प्रकृतिः, दिग्विजयः, सुशासकत्वं चेति विषयाः सम्यक्तया वर्णिताः दृश्यन्ते।

**प्रश्नः - रुद्रदाम्नः अभिलेखानुसारं सुदर्शनह्रदमाश्रित्य सुरगिरा देवनागरलिप्या च समासेन टीकां लिखत।**

**उत्तरम्** – महाक्षत्रपस्य रुद्रदाम्नः अभिलेखानुसारं ज्ञातुम् शक्यते यत्, सुदर्शन-ह्रदः आसीत् गिरिनगरस्य समीपे। अर्थात् साम्प्रतम् गिर्नारपर्वतः यत्र वर्तते तं परितः सुदर्शनः ह्रदः वर्तते।

सुदर्शनः इति नाम्नः एव अस्य ह्रदस्य सौन्दर्यम् अनुमातुं शक्यते। युगात् युगान्तरेषु समग्रस्य सुराष्ट्रस्य जनजीवनेषु प्राणस्वरूपमासीत् अस्य ह्रदस्य जलम्। प्रात्यहिकजीवनेषु तथा कृषिकर्मणि सेचकर्मणः प्रयोजनं सम्पादयितुम् अस्य ह्रदस्य जलम् आसीत् एकम् एव आश्रययोग्यम् उपादानम्। भयङ्करप्राकृतिकदुर्योगात् अस्य ह्रदस्य प्राकारे विनष्टे सति ह्रदस्य जलानि बहिः निर्गतानि अभवन्। तदा सुदर्शनम् दुर्दर्शनम् अभवत्। तथा चोक्तम् प्रशस्तिमध्ये - 'मरुधन्वकल्पमतिभृशं दुर्दर्शनम्, अपीह लोके सकले सुदर्शनं पुमान् हि दु र्दर्शनतां गतं क्षणात् इति। रुद्रदाम्नः प्रशस्त्यनुसारम् ज्ञायते यत् प्राकारभेदस्य दैर्घ्यम् आसीत् ४२० हस्तपरिमितम्, प्रस्थम् आसीत् ४२० हस्तपरिमितम्, गभीरता चासीत् ७५ हस्तपरिमितम्। अस्य ह्रदस्य उत्पत्तिम् प्रति प्राकृतिकम् भौगोलिकम् उपादानम् आसीत् त्रिविधम् – पर्वतः, नदी, गिरिखातश्च। सुदर्शनह्रदेन सह नदीद्वयस्य नाम अङ्गाङ्गितया सम्वन्धयुक्तम्। सुवर्णसिकता पलाशिनी च। इदं नदीद्वयम् चिरवाहिनीनदीरूपेण परिचितम् आसीत्। सुवर्णसिकता सोनारेखा इत्यपि उच्यते। अन्याः या नद्यः प्रसश्तिमध्ये आसन् ताः वस्तुतस्तु वर्षाजलेन संपुष्टाः आसन्। तस्मात् तासां नदीनां नामानि न उल्लिखितानि। गिरिखातविषये किमपि तथ्यम् स्कन्दगुप्तस्य अभिलेखमध्ये न प्राप्यते। अस्य सुदर्शनह्रदस्य पश्चिमा दिक् उन्मुक्ता आसीत्, अन्याश्च तिस्रः दिशः गिरिशैलेन परिवेष्टिताः आसन्। पश्चिमस्यां दिशि उन्मुक्तेन प्रदेशेन एव नगरस्य सङ्कीर्णः मार्गः अवस्थितः आसीत्। अस्य ह्रदस्य प्राकृतिकं वैशिष्ट्यं हि इमं ह्रदं परितः पार्वत्यनद्यः जलधाराश्च अवस्थिताः सन्ति। एतस्मात् कारणात् एव अयं ह्रदः सुदर्शनः ह्रदः इति परिचीयते स्म।